लोकप्रियसाहित्यग्रन्थमाला-91

।। श्रीलक्ष्मणपाठककृतः ।।

# महाभाष्यादर्शः




प्रधानसम्पादकः

प्रो. परमेश्वरनारायणशास्त्री

कुलपतिः

सम्पादकः

प्रो. गोपबन्धु मिश्रः



राष्ट्रियसंस्कृतसंस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः
मानितविश्वविद्यालयः )

नवदेहली

# PREFACE

It is a matter of great pleasure to get the manuscript of *Mahābhāṣyādarśa* published. As it is known to us that a major part of Sanskrit and oriental texts is still in a hidden world, in the form of handwritten manuscripts of various types and scripts, in every aspect of learning. This manuscript is also having its own mysterious voyage from its origion to its present pleasant publication. The period of this journey is, presumably, of more than 150 years and it is more amusing that it took its holy birth in India and was found in Paris, France. Naturally, it needs a keen attention and a careful dealing to get its real tale which stands still untold before us.

As the title of the manuscript indicates, it is a commentary on the *Mahābhāṣya* (MBH) of Patañjali in the Pāṇininan system of grammer. The system has an age-old tradition of ever longer and longer commentaries, philosophical interpretaions and exegeses. It is generally called "*Trimuni vyākaraṇa*" consisting of three sages, Pāṇini, Kātyāyana and Patañjali. The *Mahābhāṣya* (MBH) of Patañjali is having its keyfigurc as commentary on the *Sūtras* of Pāṇini and the *Vārtikas* of Kātyāyana and it has invited a good number of commentators such as Bhartṛhari with his *Dīpikā*, Kaiyaṭa with his *Pradīpa* and Nāgeśa with his *Pradīpoddyota*. As it was the common practice regarding commentaries on rules and theories, all of these commentators have adopted a prose form. But this *Mahābhāṣyādarśa* is a very rare commentary on the *Mahābhāṣya* in poetry form.

**The manuscript *Mahābhāṣyādarśa* (MBHdar) and Śrī Lakṣmaṇa Pāṭhaka**

It is a Sanskrit commentary on the *Mahābhāṣya* which is in verse-form. The manuscript is in the Bibliotheque Nationale de France

यद् वा कुर्वन्विविक्तध्वनिमितरजनैः प्रोच्यते शब्दकारी[१]-

त्यस्माल्लोकप्रवादाद्[२] ध्वनिरिह कथितः शब्द[३] इत्याहुरार्याः ।।१६ ।।

रक्षोहागमलाघवानि च तथा संदेह[४] एतान्यथो[५]

भूयोऽन्यानि च[६] ते[७]ऽसुरा[८] इति तथा यद्दुष्ट[९] इत्यादि च।

एवं स्याद्यदधीत[१०]मित्यथ परं यस्तु प्रयुङ्क्ते[११] तथा-

विद्वांसोऽपि[१२] च याज्ञिकाः परिपठन्त्येवं[१३] प्रयाजा[१४] इति ।।१७ ।।

---

१. मभा, पस्पशा, अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा-शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः, इति ध्वनिं कुर्वन्नेवमुच्यते।

२. T प्रवादात्

३. मभा, पस्पशा, तस्मात् ध्वनिः शब्दः।

४. मभा, पस्पशा, रक्षोहागमलघ्वसंदेहाः प्रयोजनम्।

५. T एतन्यथा

६. मभा, पस्पशा, इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि।

७. T चेसुरा

८. मभा, पस्पशा, तेसुराः-तेसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः।

९. मभा, पस्पशा, दुष्टः शब्दः

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

१०. मभा, पस्पशा, यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।।

११. मभा, पस्पशा, यस्तु प्रयु॥ कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः।।

१२. मभा, पस्पशा, अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्।।

१३. T पठंत्येवं

१४. मभा, पस्पशा, याज्ञिकाः पठन्ति-'प्रयाजाः सविभक्तिकाः कार्याः' इति। न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम्।



**Head Quarter and Delhi Campus**


राष्ट्रियसंस्कृतसंस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058